# Shri Parijnanashrama Trayodashi

# શ્રીપરિજ્ઞાનાશ્રમત્રયોદશી

## Document Information

Text title : parijnAnAshramatrayodashI

File name : parijnAnAshramatrayodashI.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Shri Ganesha Shatavadhani

Proofread by : NA

Source : Shri Chitrapura Stuti Manjari,3rd ed. 2008

Acknowledge-Permission: Shri Chitrapur Math - Publications Committee https://chitrapurmath.net/

Latest update : March 2, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 19, 2020

*sanskritdocuments.org*

# શ્રીપરિજ્ઞાનાશ્રમત્રયોદશી

આનન્દાશ્રમશિષ્યાગ્ર્યં સ્વાનન્દામ્બુધિમજ્જિતમ્ ।
આનન્દાશ્રમિણં વન્દે પરિજ્ઞાનાશ્રમં ગુરુમ્ ॥ ૧॥

શ્રીવિદ્યોપાસનોદ્યાને માયૂરં વિભ્રમં સદા ।
યશ્ચક્રે તં નમો નિત્યં પરિજ્ઞાનાશ્રમં ગુરુમ્ ॥ ૨॥

બાલ્યે દીપનમસ્કારે યસ્ય વૈરાગ્યધીશિખા ।
જજ્વાલ તં સદા વન્દે પરિજ્ઞાનાશ્રમં ગુરુમ્ ॥ ૩॥

શિષ્યાન્તશ્શોધને યદ્વત્તદ્વદ્ગ્રન્ત્રાલિશોધને ।
કૌતુકં યસ્ય તં વન્દે પરિજ્ઞાનાશ્રમં ગુરુમ્ ॥ ૪॥

ભવરોગહરો યોઽભૂચ્છિવયોગપરોઽનિશમ્ ।
ત વન્દે સિદ્ધિસમ્પન્નં પરિજ્ઞાનાશ્રમં ગુરુમ્ ॥ ૫॥

શુનિ ચૈવ સમદૃષ્ટા જ્ઞાનીત્યાગમદૃષ્ટયે ।
આસીદ્યસ્તં નુમો હાર્દં પરિજ્ઞાનાશ્રમં ગુરુમ્ ॥ ૬॥

સારસ્વતજનપ્રીતસ્સારસ્વતસમર્ચકઃ ।
ય આસીત્ તં મુદા વન્દે પરિજ્ઞાનાશ્રમં ગુરુમ્ ॥ ૭॥

વિદ્યાવૃદ્ધસ્તપોવૃદ્ધો વયોવૃદ્ધાશ્રયો બભૌ ।
ય કારુણ્યેન તં વન્દે પરિજ્ઞાનાશ્રમં ગુરુમ્ ॥ ૮॥

યોઽનુકર્તું વિભું ચક્રે વિશ્વવસ્ત્વાલયઙ્કુરમ્ ।
વસ્ત્વાગારં નુમસ્તં શ્રીપરિજ્ઞાનાશ્રમં ગુરુમ્ ॥ ૯॥

નિર્મિમે નિર્મમેન્દ્રો યઃ સ્તવાન્ વેદાન્તવાસિતાન્ ।
ગીતાસક્તં નુમસ્તં શ્રીપરિજ્ઞાનાશ્રમં ગુરુમ્ ॥ ૧૦॥

કૈવલ્યસંનિકર્ષત્વે તથાહંગ્રહચિન્તને ।
યસ્યાસીદ્દૃદયં વન્દે પરિજ્ઞાનાશ્રમં ગુરુમ્ ॥ ૧૧॥

ભક્તચેતોરથાધ્યક્ષો રથયાત્રાં મહેશિતુઃ ।
યશ્ચક્રે તં નુમોઽજસ્રં પરિજ્ઞાનાશ્રમં ગુરુમ્ ॥ ૧૨॥

દુર્ગં નિર્માય દુર્ગાયૈ સ્વસર્ગં યો રુરોધતમ્ ।
અપવર્ગપ્રદં વન્દે પરિજ્ઞાનાશ્રમં ગુરુમ્ ॥ ૧૩॥

શ્રીશ્રીપરિજ્ઞાનાશ્રમયતીશ્વરાણાં
 તુર્યાશ્રમાલઙ્કૃતિરૂપકાણામ્ ।
સ્તોત્રં પઠેદ્યઃ પ્રયતઃ પ્રણમ્રઃ ।
 પ્રાપ્નોતિ પૂર્ણાં કરુણાં ગુરૂણામ્ ॥

ઇતિ શ્રીગણેશ શતાવધાનીમહોદયવિરચિતા
 શ્રીપરિજ્ઞાનાશ્રમત્રદયોદશી સમાપ્તા ।

*Shri Parijnanashrama Trayodashi*

pdf was typeset on December 19, 2020

Please send corrections to *sanskrit@cheerful.com*